# नैवेद्यम्



डा. सदानन्दझा[1]

यत्पादपङ्कजरजः समवाप्यविश्वं

ब्रह्मा सृजत्यनुदिनं च बिभर्ति विष्णुः

रुद्रश्च संहरति नेतरथा समर्था-

स्तस्यैनमोऽस्तु सततं जगदम्बिकायै॥

अये सकलशास्त्रपरिशीलनबद्धादरा गीर्वाणवाणिपदकमलानुरागिणः पाठकाश्च!

विश्वस्य प्रथमान्तर्जालीयसंस्कृतत्रैमासिकजाह्नव्याः पत्रिकाया अष्टादशाङ्कं तत्र भवतां विविधबुधवन्दितचरणानां सन्तत जाह्नव्याः प्रचार-प्रसारविधौ दत्तचित्तानां कृपार्णवानां तत्र भवतां श्रीमतां पुरतः समुपस्थापयन् मोमुद्यमानमानसोऽस्मि।

अस्माकं परमसौभाग्यवशादेव प्रस्तुताङ्कस्यलोकार्पणकार्यक्रमः वाराणस्याः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीय कुलपतिचरैः निखिलबुधवृन्दवन्दितचरणैः स्वनामधन्यैः प्रो. अभिराजराजेन्द्रमिश्रमहाभागैः सम्पादनाय स्वीयानुमतिः प्रदायि। अतस्तान् गुरुचरणान् साञ्जलिं प्रणमति सकलजाह्नवीपरिवारः।

विदांकुर्वन्त्वेव श्रीमन्तः संस्कृतपत्रिकायाः संचालनकार्यं मणिमण्डितव्यालस्य परिष्करणमिव दुष्करं तथापि नानाशास्त्रीय गहनचिन्तकानामाचार्याणां सहयोगमवाप्य जाह्नवी सारस्वतरङ्गस्थले सन्ततं नृत्यति॥ एतदर्थं तेभ्यः भूयोभूयः कार्तज्ञ्यं प्रकटयति जाह्नवीपरिवारः। एषा पत्रिका संस्कृतप्रचार-प्रसाराय समर्पिता राजनीतिविमुखा आक्षेपरहिता च विद्यते।

प्रस्तुताङ्के विविधशास्त्ररसिकानां सुरसरस्वतीसमुपासकानां पण्डितानां नानाराज्येभ्यः समागतपाण्डित्यपूर्णा आलेखाः विद्यन्ते यथा- ज्योतिषशास्त्रस्य योगानां साहित्यशास्त्रे प्रयोगः, संस्काराणां शैक्षिकं मनोवैज्ञानिकं च विमर्शः, प्रातिशाख्यग्रन्थाः वैदिकव्याकरणञ्च प्रमुखाः।

---

[1] **मुख्यसम्पादकः, व्याकरणविभागाध्यक्षः, ज. ना.ब्र. आदर्श संस्कृत, महाविद्यालयः, लगमा, रामभद्रपुरम्, दरभङ्गा, बिहारः**

प्रस्तुतपत्रिकेयमुपहसनीया अनुपहसनीयेति वा इत्यादिकान् प्रश्नान् विचारयितुं विदुषामुपरि संस्थाप्य विरन्तुमीहेऽहम्। आशाऽसे प्रकृतशोधनिबन्धेभ्यः शास्त्ररसिकानामनुसन्धित्सूनां गवेषकानां च लाभो भविष्यति।

अन्ते परमेश्वरस्य विश्वनाथस्य जटातः प्रवहन्ती सुरधुनिमुनिकन्या त्रैलोक्यं मज्जतां मनोनिर्मलं विधायप्रसादयति मुक्तिपथं च प्रकाशयति तथैवेयं मदीया पत्रिका देववाणीचिन्तकानां हृदि दिव्यसौरभं प्रसादं च प्रयच्छतादित्यहं कामये।

**श्रुतध्वनिमनोहरा कलुषहारिणीपावनी**

**स्मृताप्यतनुतापहृत् समवगाहसौख्यावहा।**

**निषेव्यपदपंकजा विबुधमान्याऽमला**

**समस्तजगतीतले प्रवहतादियं जाह्नवी।**

**विद्वच्चरणचञ्चरीकः**

**झोपाख्यः सदानन्दः**

**लखनौरम्, बिहारः**
**25.05.2014**

****************************************************